श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ षष्ठस्कन्धे एकादशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ षष्ठस्कन्धे एकादशोऽध्यायः ॥

श्रीशुक उवाच
त एवं शंसतो धर्मं वचः पत्युरचेतसः।
नैवागृह्णन् भयत्रस्ताः पलायनपरा नृप ॥ 1 ॥

विशीर्यमाणां पृतनामासुरीमसुरर्षभः।
कालानुकूलैस्त्रिदशैः काल्यमानामनाथवत् ॥ 2 ॥

दृष्ट्वातप्यत सङ्क्रुद्ध इन्द्रशत्रुरमर्षितः।
तान् निवार्यौजसा राजन् निर्भर्त्स्येदमुवाच ह ॥ 3 ॥

किं व उच्चरितैर्मातुर्धावद्भिः पृष्ठतो हतैः।
न हि भीतवधः श्लाघ्यो न स्वर्ग्यः शूरमानिनाम् ॥ 4 ॥

यदि वः प्रधने श्रद्धा सारं वा क्षुल्लका हृदि।
अग्रे तिष्ठत मात्रं मे न चेद् ग्राम्यसुखे स्पृहा ॥ 5 ॥

एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून्।
व्यनदत् सुमहाप्राणो येन लोका विचेतसः ॥ 6 ॥

तेन देवगणाः सर्वे वृत्रविस्फोटनेन वै।
निपेतुर्मूर्च्छिता भूमौ यथैवाशनिना हताः ॥ 7 ॥

ममर्द पद्भ्यां सुरसैन्यमातुरं
    निमीलिताक्षं रणरङ्गदुर्मदः।
गां कम्पयन्नुद्यतशूल ओजसा
    नालं वनं यूथपतिर्यथोन्मदः॥ **8** ॥

विलोक्य तं वज्रधरोऽत्यमर्षितः
    स्वशत्रवेऽभिद्रवते महागदाम्।
चिक्षेप तामापततीं सुदुःसहां
    जग्राह वामेन करेण लीलया॥ **9** ॥

स इन्द्रशत्रुः कुपितो भृशं तया
    महेन्द्रवाहं गदयोग्रविक्रमः।
जघान कुम्भस्थल उन्नदन् मृधे
    तत्कर्म सर्वे समपूजयन्नृप॥ **10** ॥

ऐरावतो वृत्रगदाभिमृष्टो
    विघूर्णितोऽद्रिः कुलिशाहतो यथा।
अपासरद् भिन्नमुखः सहेन्द्रो
    मुञ्चन्नसृक् सप्तधनुर्भृशार्तः॥ **11** ॥

न सन्नवाहाय विषण्णचेतसे
    प्रायुङ्क्त भूयः स गदां महात्मा।
इन्द्रोऽमृतस्यन्दिकराभिमर्श -
    वीतव्यथक्षतवाहोऽवतस्थे॥ **12** ॥

स तं नृपेन्द्राहवकाम्यया रिपुं
    वज्रायुधं भ्रातृहणं विलोक्य।
स्मरंश्च तत्कर्म नृशंसमंहः
    शोकेन मोहेन हसञ्जगाद॥ **13** ॥

वृत्र उवाच
दिष्ट्या भवान् मे समवस्थितो रिपु -
    र्यो ब्रह्महा गुरुहा भ्रातृहा च।
दिष्ट्यानृणोऽद्याहमसत्तम त्वया
    मच्छूलनिर्भिन्नदृषद्धृदाचिरात्॥ **14** ॥

यो नोऽग्रजस्यात्मविदो द्विजाते -
    र्गुरोरपापस्य च दीक्षितस्य।
विश्रभ्य खड्गेन शिरांस्यवृश्चत्
    पशोरिवाकरुणः स्वर्गकामः॥ **15** ॥

ह्रीश्रीदयाकीर्तिभिरुज्झितं त्वां
    स्वकर्मणा पुरुषादैश्च गर्ह्यम्।
कृच्छ्रेण मच्छूलविभिन्नदेह -
    मस्पृष्टवह्निं समदन्ति गृध्राः॥ **16** ॥

अन्येऽनु ये त्वेह नृशंसमज्ञा
    ये ह्युद्यतास्त्राः प्रहरन्ति मह्यम्।
तैर्भूतनाथान् सगणान् निशात -
    त्रिशूलनिर्भिन्नगलैर्यजामि॥ **17** ॥

अथो हरे मे कुलिशेन वीर
    हर्ता प्रमथ्यैव शिरो यदीह।
तत्रानृणो भूतबलिं विधाय
    मनस्विनां पादरजः प्रपत्स्ये॥ **18** ॥

सुरेश कस्मान्न हिनोषि वज्रं
    पुरः स्थिते वैरिणि मय्यमोघम्।

मा संशयिष्ठा न गदेव वज्रः
स्यान्निष्फलं कृपणार्थेव याच्ञा ॥ 19 ॥

नन्वेष वज्रस्तव शक्र तेजसा
हरेर्दधीचेस्तपसा च तेजितः।
तेनैव शत्रुं जहि विष्णुयन्त्रितो
यतो हरिर्विजयः श्रीर्गुणास्ततः ॥ 20 ॥

अहं समाधाय मनो यथाऽऽह
सङ्कर्षणस्तच्चरणारविन्दे।
त्वद्वज्ररंहोलुलितग्राम्यपाशो
गतिं मुनेर्याम्यपविद्धलोकः ॥ 21 ॥

पुंसां किलैकान्तधियां स्वकानां
याः सम्पदो दिवि भूमौ रसायाम्।
न राति यद् द्वेष उद्वेग आधि -
र्मदः कलिर्व्यसनं सम्प्रयासः ॥ 22 ॥

त्रैवर्गिकायासविघातमस्मत् -
पतिर्विधत्ते पुरुषस्य शक्र।
ततोऽनुमेयो भगवत्प्रसादो
यो दुर्लभोऽकिञ्चनगोचरोऽन्यैः ॥ 23 ॥

अहं हरे तव पादैकमूल -
दासानुदासो भवितास्मि भूयः।
मनः स्मरेतासुपतेर्गुणांस्ते
गृणीत वाक् कर्म करोतु कायः ॥ 24 ॥

न नाकपृष्ठं न च पारमेष्ठ्यं
न सार्वभौमं न रसाधिपत्यम्।

न योगसिद्धीरपुनर्भवं वा
    समञ्जस त्वा विरहय्य काङ्क्षे ॥ **25** ॥

अजातपक्षा इव मातरं खगाः
    स्तन्यं यथा वत्सतराः क्षुधार्ताः।
प्रियं प्रियेव व्युषितं विषण्णा
    मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥ **26** ॥

ममोत्तमश्लोकजनेषु सख्यं
    संसारचक्रे भ्रमतः स्वकर्मभिः।
त्वन्माययाऽऽत्मात्मजदारगेहे -
    ष्वासक्तचित्तस्य न नाथ भूयात् ॥ **27** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
षष्ठस्कन्धे वृत्रस्येन्द्रोपदेशो नाम एकादशोऽध्यायः ॥